This PDF you are browsing now is a digitized copy of rare books and manuscripts from the Jnanayogi Dr. Shrikant Jichkar Knowledge Resource Center Library located in Kavikulaguru Kalidas Sanskrit University Ramtek, Maharashtra.

KKSU University (1997- Present) in Ramtek, Maharashtra is an institution dedicated to the advanced learning of Sanskrit.
The University Collection is offered freely to the Community of Scholars with the intent to promote Sanskrit Learning.

Website
https://kksu.co.in/
Digitization was executed by NMM

https://www.namami.gov.in/

Sincerely,

Prof. Shrinivasa Varkhedi
Hon'ble Vice-Chancellor

Dr. Deepak Kapade
Librarian

Digital Uploaded by eGangotri Digital Preservation Trust, New Delhi
https://egangotri.wordpress.com/

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कविकुलगुरु कालिदास संस्कृत विश्वविद्यालय, रामटेक
हस्तलिखित संग्रह

दाखल क्र. M 980 विषय वैदिक.
नाव. ऋग्वेदीय त्रिकाल संध्या (मुद्रित).
लेखक/लिपीकार —.
पृष्ठ 10 काळ शके 1839 पूर्ण/~~अपूर्ण~~

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥ अथ ऋग्वेदीया त्रिकालसंध्या ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्रीगणेशाय नमः ॥ अथभस्मधारणविधिः ॥ आचम्य प्राणायामं कृत्वा ॥ अद्येत्यादिपूर्वो० शरीरशुद्ध्यर्थं भस्मधारणमहं करिष्ये । मानं स्तोकंतनयेमानंआयौमानोगोषुमानोअश्वेषुरीरिषः ॥ वीरान्मानोरुद्र भामितोवधीर्हविष्मंतःसदमित्वाहवामहे ॥ (इति हस्ते भस्म गृहीत्वा जलमिश्रितं कृत्वा) ॥ ईशानः सर्वविद्यानामीश्वरःसर्वभूतानांब्रह्माधिपतिर्ब्रह्मणोधिपतिर्ब्रह्माशिवोमेअस्तुसदाशिवोम् ॥ शिरसि ॥ तत्पुरुषायविद्महेमहादेवायधीमहि ॥ तन्नोरुद्रःप्रचोदयात् ॥ मुखे ॥ अघोरेभ्योथघोरेभ्योघोरघोरतरेभ्यः ॥ सर्वेभ्यःसर्वशर्वेभ्योनमस्ते अस्तुरुद्ररूपेभ्यः ॥ हृदये ॥ वामदेवायनमोज्येष्ठायनमःश्रेष्ठायनमोरुद्रायनमःकालायनमःकलविकरणायनमोबलविकरणायनमोबलायनमोबलप्रमथनायनमःसर्वभूतदमनायनमोमनोन्मनायनमः ॥ गुह्ये ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सद्योजातंप्रपद्यामिसद्योजातायवैनमोनमः ॥ भवेभवेनातिभवेभवस्व
मां भवोद्भवायनमः ॥ पादयोः ॥ अग्निरिति भस्म । वायुरिति भस्म ।
जलमिति भस्म । स्थलमिति भस्म । व्योमेति भस्म । सर्वं हवा इदं
भस्म । मन एतानि चक्षूंषि भस्मानि ॥ तच्च ॥ ॐनमः शिवाय इति
त्रिवारोच्चारितेन सर्वाङ्गे विलिप्य आचामेत् ॥
श्रीगणेशाय नमः ॥ ॥ अथ प्रातःसंध्याप्रारंभः ॥ केशवाय नमः ।
नारायणाय नमः । माधवाय नमः । गोविंदाय नमः । विष्णवे नमः ।
मधुसूदनाय नमः । त्रिविक्रमाय नमः । वामनाय नमः । श्रीधराय नमः ।
हृषीकेशाय नमः । पद्मनाभाय नमः । दामोदराय नमः । संकर्षणाय
नमः । वासुदेवाय नमः । प्रद्युम्नाय नमः । अनिरुद्धाय नमः । पुरु-
षोत्तमाय नमः । अधोक्षजाय नमः । नारसिंहाय नमः । अच्युताय

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नमः । जनार्दनाय नमः । उपेंद्राय नमः । हरये नमः । श्रीकृष्णाय नमः । प्रणवस्य परब्रह्म ऋषिः परमात्मा देवता । दैवीगायत्री छंदः । सप्तानां व्याहृतीनां विश्वामित्रजमदग्निभरद्वाजगौतमात्रिवसिष्ठकश्यपा ऋषयः । अग्निवाय्वादित्यबृहस्पतिवरुणेंद्रविश्वेदेवा देवताः । गायत्र्युष्णिगनुष्टुब्बृहतीपंक्तित्रिष्टुप्जगत्यश्छंदांसि । गायत्र्या विश्वामित्र ऋषिः । सविता देवता । गायत्री छंदः । गायत्रीशिरसः प्रजापतिर्ऋषिः । ब्रह्माग्निवाय्वादित्या देवताः यजुश्छंदः । प्राणायामे विनियोगः ॥ ॐभूः ॐभुवः ॐस्वः ॐमहः ॐजनः ॐतपः ॐसत्यं ॐतत्स॑वि॒तुर्वरे॑ण्यं॒भर्गो॑दे॒वस्य॑धीमहि ॥ धियो॒योन॑ःप्रचो॒दया॑त् ॥ ॐआपोज्योतीरसोमृतंब्रह्मभूर्भुवःस्वरोम् ॥ ममोपात्तदुरितक्षयद्वारा श्रीपरमेश्वरप्रीत्यर्थं प्रातःसंध्यामुपासिष्ये । आपोहिष्ठेति तृचस्यां-

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

बरीषः सिंधुद्वीप ऋषिः । आपो देवता गायत्री छंदः । मार्जने विनि-
योगः॥ ॐआपोहिष्ठामयोभुवस्तानऊर्जेदधातन॥ महेरणायचक्षसे॥
योवःशिवतमोरसस्तस्यभाजयतेहनः ॥ उशतीरिवमातरः॥ तस्माअ
रंगमामवोयस्यक्षयायजिन्वथ ॥ आपोजनयथाचनः॥ सूर्यश्चेति मं-
त्रस्य याज्ञवल्क्य उपनिषद ऋषिः । सूर्यमन्युमन्युपतिरात्रयो देव-
ताः । प्रकृतिश्छंदः । मंत्राचमने विनियोगः ॥ ॐसूर्यश्चमामन्यु-
श्चमन्युपतयश्चमन्युकृतेभ्यः ॥ पापेभ्योरक्षंताम् ॥ यद्रात्रियापापम
कार्षं ॥ मनसावाचाहस्ताभ्यां ॥ पद्भ्यामुदरेणशिश्ना ॥ रात्रिस्तदव
लुंपतु ॥ यत्किंचदुरितंमयि ॥ इदमहंमाममृतयोनौ ॥ सूर्येज्योतिषिजु
होमिस्वाहा ॥ इति जलं पीत्वा आचम्य ॥ आपोहिष्ठेति नवर्चस्य
सूक्तस्यांबरीषः सिंधुद्वीप आपो गायत्री । पंचमी वर्धमाना सप्तमी

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

प्रतिष्ठा अंत्ये द्वे अनुष्टुभौ ॥ मार्जने विनियोगः ॥ ॐआपोहिष्ठेति
ऋक्त्रयम् ॥ शंनोदेवीरभिष्टयआपोभवंतुपीतये ॥ शंयोरभिस्रवंतु
नः ॥ ईशानावार्याणांक्षयंतीश्चर्षणीनाम् ॥ अपोयाचामिभेषजम् ॥
अप्सुमेसोमोअब्रवीदंतर्विश्वानिभेषजा ॥ अग्निंचविश्वशंभुवम् ॥ आ-
पःपृणीतभेषजंवरूथंतन्वे३ममं ॥ ज्योक्चसूर्यंदृशे ॥ इदमापःप्रवह
तयत्किंचदुरितंमयि ॥ यद्वाहमभिदुद्रोहयद्वाशेपउतानृतम् ॥ आपोअ
द्यान्वचारिषंरसेनसमगस्महि ॥ पयस्वानग्नआगहितंमासंसृजवर्चसा ॥
सस्रुषीस्तदपसोदिवानक्तंसस्रुषीः ॥ वरेण्यक्रतूरहमादेवीरवसेहुवे ॥
ऋतंचेति तृचस्य सूक्तस्य माधुच्छंदसोऽघमर्षण ऋषिः । भाववृत्ति
देवता । अनुष्टुप् छंदः । जलाघमर्षणे विनियोगः ॥ ॐऋतंचसत्यं
चाभीद्धात्तपसोध्यजायत ॥ ततोरात्र्यजायततःसमुद्रोअर्णवः ॥ स

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मुद्रादर्णवादधिसंवत्सरोअजायत ॥ अहोरात्राणिविदधद्विश्वस्यमिष
तोवशी ॥ सूर्याचंद्रमसौधातायथापूर्वमकल्पयत् ॥ दिवंचपृथिवींचां
तरिक्षमथोस्वः ॥ दक्षिणनासया पापपुरुषं निरस्य तज्जलं नावलोक्य
वामभागे क्षितौ क्षिपेत् । आचम्य ॥ गायत्र्या विश्वामित्रः सविता
गायत्री । श्रीसूर्यायार्घ्यदाने विनियोगः ॥ ॐभूर्भुवःस्वः तत्सवितुर्व०
श्रीसवितृसूर्यनारायणाय इदमर्घ्यं दत्तं न मम ॥ इति त्रिः । आच-
म्य प्राणायामं कृत्वा ॥ पृथ्वीति मंत्रस्य मेरुपृष्ठऋषिः ॥ कूर्मो देव-
ता । सुतलं छंदः । आसने विनियोगः ॥ ॐपृथ्वि त्वया धृता लोका
देवि त्वं विष्णुना धृता ॥ त्वं च धारय मां देवि पवित्रं कुरु चासन-
म् । ऊर्ध्वकेशि विरूपाक्षि मांसशोणितभक्षणे ॥ तिष्ठ देवि शिखा-
बंधे चामुंडे ह्यपराजिते ॥ अपसर्पंतु ते भूता ये भूता भूमिसंस्थि-

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ताः ॥ ये भूता विघ्नकर्तारस्ते गच्छंतु शिवाज्ञया ॥ अपक्रामंतु भू-
तानि पिशाचाः सर्वतोदिशम् ॥ सर्वेषामविरोधेन ब्रह्मकर्म समा-
रभे ॥ गायत्र्या विश्वामित्र ऋषिः । सविता देवता । गायत्री छंदः ।
न्यासे विनियोगः । ॐतत्सवितुर्हृदयाय नमः । वरेण्यं शिरसे स्वाहा ।
भर्गोदेवस्य शिखायै वषट् । धीमहि कवचाय हुम् । धियोयोनो ने-
त्रत्रयाय वौषट् । प्रचोदयात् अस्त्राय फट् । इति दिग्बंधः ॥ बालां
बालादित्यमंडलमध्यस्थां रक्तवर्णां रक्तांबरानुलेपनस्रगाभरणां चतु-
र्वक्त्रां दंडकमंडल्वक्षसूत्राभयांकचतुर्भुजां हंसासनारूढां ब्रह्मदैवत्या-
मृग्वेदमुदाहरंतीं भूर्लोकाधिष्ठात्रीं गायत्रीं नाम देवतां ध्यायामि ॥
आगच्छ वरदे देवि जपे मे संनिधौ भव ॥ गायंतं त्रायसे यस्माद्गाय-
त्री त्वं ततः स्मृता ॥ गायत्रीजपमहं करिष्ये ॥ अष्टोत्तरशतमष्टाविंश-

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तिर्दशवारं वा गायत्रीं जप्त्वा ॥ पुनः तत्सवितुरिति षडंगन्यासं कृत्वा उपस्थानं कुर्यात् ॥ जातवेदसे मारीचः कश्यपो जातवेदा अग्निस्त्रिष्टुप् ॥ उपस्थाने विनियोगः ॥ ॐजातवेदसेसुनवामसोममरातीयतो-निदहातिवेदः ॥ सनःपर्षदतिदुर्गाणिविश्वानावेवसिंधुंदुरितात्यग्निः ॥ मित्रोजनानिति नवर्चस्य सूक्तस्य गाथिनो विश्वामित्रः सविता त्रिष्टुप् अंत्याश्चतस्रो गायत्र्यः सूर्योपस्थाने विनियोगः ॥ ॐमित्रोजनान्यातयतिब्रुवाणोमित्रोदाधारपृथिवीमुतद्यां ॥ मित्रःकृष्टीरनिमिषाभिचष्टेमित्रायहव्यंघृतवज्जुहोत ॥ प्रसमित्रमर्तोअस्तुप्रयस्वान्यस्तआदित्यशिक्षतिव्रतेन ॥ नहन्यतेनजीयतेत्वोतोनैनमंहोअश्नोत्यंतितोनदूरात् ॥ अनमीवासइळयामदंतोमितज्ञवोवरिमहापृथिव्याः ॥ आदित्यस्यव्रतमुपक्षियंतोवयंमित्रस्यसुमतौस्याम ॥ अयंमित्रोनमस्यःसुशे

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वोराजासुक्षत्रोअजनिष्टवेधाः ॥ तस्यवयंसुमतौयज्ञियस्यापिभद्रेसौम
नसेस्याम ॥ महाँआदित्योनमसोपसद्योयातयज्जनोगृणतेसुशेवः ॥
तस्माएतत्पन्यतमायजुष्टमग्नौमित्रायहविराजुहोत ॥ मित्रस्यर्षणी
धृतोऽवोदेवस्यसानसि ॥ द्युम्नंचित्रश्रवस्तमम् ॥ अभियोमहिनादिवं
मित्रोबभूवसप्रथाः ॥ अभिश्रवोभिःपृथिवीम् ॥ मित्रायपंचयेमिरेज
नाअभिष्टिशवसे ॥ सदेवान्विश्वान्बिभर्ति ॥ मित्रोदेवेष्वायुषुजनायवृ-
क्तबर्हिषे ॥ इषइष्टव्रताअकः ॥ त्र्यंबकं मैत्रावरुणिर्वसिष्ठो रुद्रोऽनु-
ष्टुप् । उपस्थाने विनियोगः ॥ ॐत्र्यंबकंयजामहेसुगंधिंपुष्टिवर्धनम् ॥
उर्वारुकमिवबंधनान्मृत्योर्मुक्षीयमामृतात् ॥ तच्छंयोः शंयुर्विश्वेदेवाः
शक्करी । उपस्थाने विनियोगः ॥ ॐतच्छंयोरावृणीमहेगातुंयज्ञायगा-
तुंयज्ञपतयेदैवीःस्वस्तिरस्तुनःस्वस्तिर्मानुषेभ्यः ॥ ऊर्ध्वंजिगातुभेष-

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

जम् ॥ शंनोअस्तुद्विपदेशंचतुष्पदे ॥ नमो ब्रह्मणे प्रजापतिर्वि-
श्वेदेवा जगती । उपस्थाने विनियोगः ॥ ॐनमोब्रह्मणेनमोअ
स्त्वग्नयेनमःपृथिव्यैनमओषधीभ्यः ॥ नमोवाचेनमोवाचस्पतयेनमो
विष्णवेमहतेकरोमि ॥ प्राच्यै दिशे इंद्राय च नमः । आग्नेय्यै दिशे
अग्नये च नमः । दक्षिणायै दिशे यमाय च नमः । नैर्ऋत्यै दिशे
निर्ऋतये च नमः । प्रतीच्यै दिशे वरुणाय च नमः । वायव्यै दिशे
वायवे च नमः । उदीच्यै दिशे सोमाय च नमः । ईशान्यै दिशे ईश्व-
राय च नमः । ऊर्ध्वायै दिशे ब्रह्मणे च नमः । अधरायै दिशे अनं-
ताय च नमः । संध्यायै नमः । गायत्र्यै नमः । सावित्र्यै नमः । सरस्वत्यै
नमः । सर्वाभ्यो देवताभ्यो नमः ॥ यां सदा सर्वभूतानि स्थावराणि
चराणि च ॥ सायं प्रातर्नमस्यंति सा मा संध्याऽभिरक्षतु ॥ अमुक

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

गोत्रामुकप्रवरोत्पन्नोऽहममुकशर्मा भो गुरो त्वामभिवादयामि ॥ उत्तमे शिखरे जाते भूम्यां पर्वतमूर्धनि ॥ ब्राह्मणेभ्योऽभ्यनुज्ञाता गच्छ देवि यथासुखम् ॥ भद्रंनोअपिवातयमनः ॥ ॐ शांतिःशांतिःशांतिः ॥ प्रदक्षिणं परिभ्रमन् । आसत्यलोकादापातालादालोकालोकपर्वतात् ॥ ये संति ब्राह्मणा देवास्तेभ्यो नित्यं नमो नमः ॥ इति गुरूनभिवादयेत् । अनेन प्रातःसंध्यावंदनेन कर्मणा श्रीपरमेश्वरः प्रीयतां ॥ ॐ तत्सद्ब्रह्मार्पणमस्तु ॥ ॥ ॥

श्रीगणेशाय नमः ॥ आचम्य प्राणानायम्य ॥ ममोपात्तदुरितक्षयद्वारा श्रीपरमेश्वरप्रीत्यर्थं मध्याह्नसंध्यामुपासिष्ये ॥ आपोहिष्ठेति तृचेन पूर्ववत्प्रथमं मार्जनं कृत्वा मंत्राचमनं कार्यं ॥ आपः पुनंत्वित्यस्यानुवाकस्य नारायण आपो अष्टिः मंत्राचमने विनियोगः ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ॐ आपः पुनंतुपृथिवींपृथिवीपूतापुनातुमां ॥ पुनंतुब्रह्मणस्पतिर्ब्रह्म पूतापुनातुमां ॥ यदुच्छिष्टमभोज्यंयद्वादुश्चरितंमम ॥ सर्वंपुनंतुमामापोसतांचप्रतिग्रहꣳस्वाहा ॥ इति अपः पीत्वा । आचम्य प्रातःसंध्यावत् द्वितीयं मार्जनं अघमर्षणांतं कृत्वा ॥ हंसःशुचिषदिति मंत्रस्य गोतमो वामदेवः सूर्यो जगती ॥ अर्घ्यदाने विनियोगः ॥ ॐ हंसः शुचिषद्वसुरंतरिक्षसद्धोतावेदिषदतिथिर्दुरोणसत् ॥ नृषद्वरसदृतसद्व्योमसदब्जागोजाऋतजाअद्रिजाऋतं ॥ श्रीसूर्याय इदमर्घ्यं दत्तं न मम ॥ आत्मानं परिषिच्य द्विराचम्य ॥ ऊर्ध्वबाहुरुन्मुखःसूर्यमुपतिष्ठेत ॥ उदुत्यमिति त्रयोदशर्चस्य सूक्तस्य काण्वः प्रस्कण्व ऋषिः श्रीसूर्यो देवता नवाद्या गायत्र्यः अंत्याश्चतस्रोनुष्टुभः ॥ चित्रं देवानामिति षळृचस्य सूक्तस्य आंगिरसः कुत्सः सूर्यस्त्रिष्टुप् सूर्योपस्थाने

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

विनियोगः ॥ ॐउदुत्यंजातवेदसंदेवंवहंतिकेतवः ॥ दृशेविश्वायसूर्यं ॥
अपत्येतायवोयथानक्षत्रायंत्यक्तुभिः ॥ सूरायविश्वचक्षसे ॥ अदृश्रम
स्यकेतवोविरश्मयोजनाँअनु ॥ भ्राजंतोअग्नयोयथा ॥ तरणिर्विश्वद
र्शतोज्योतिष्कृदसिसूर्य ॥ विश्वमाभासिरोचनं ॥ प्रत्यङ्देवानांविशः
प्रत्यङ्ङुदेषिमानुषान् ॥ प्रत्यङ्विश्वंस्वर्दृशे ॥ १ ॥ येनापावकचक्ष
साभुरण्यंतंजनाँअनु ॥ त्वंवरुणपश्यसि ॥ विद्यामेषिरजस्पृथ्वहामि
मानोअक्तुभिः ॥ पश्यन्जन्मानिसूर्य ॥ सप्तत्वाहरितोरथेवहंतिदेव
सूर्य ॥ शोचिष्केशंविचक्षण ॥ अयुक्तसप्तशुध्युवःसूरोरथस्यनप्त्यः ॥
ताभिर्यातिस्वयुक्तिभिः ॥ उद्वयंतमसस्परिज्योतिष्पश्यंतउत्तरं ॥ देवं
देवत्रासूर्यमगन्मज्योतिरुत्तमं ॥ उद्यन्नद्यमित्रमहआरोहन्नुत्तरांदिवं ॥
हृद्रोगंममसूर्यहरिमाणंचनाशय ॥ शुकेषुमेहरिमाणंरोपणाकासुदध्म

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सि ॥ अथोहारिद्रवेषुमेहरिमाणंनिदध्मसि ॥ उदगादयमादित्योवि
श्वेनसहसासह ॥ द्विषंतंमह्यंरंधयन्मोअहंद्विषतेरंधं ॥ २ ॥ चित्रंदेवा
नामुदगादनीकंचक्षुर्मित्रस्यवरुणस्याग्नेः ॥ आप्राद्यावापृथिवीअंतारि
क्षंसूर्यआत्माजगतस्तस्थुषश्च ॥ सूर्योदेवीमुषसंरोचमानांमर्योनयोषा
मभ्येतिपश्चात् ॥ यत्रानरोदेवयंतोयुगानिवितन्वतेप्रतिभद्रायभद्रं ॥
भद्राअश्वाहरितःसूर्यस्यचित्राएतग्वाअनुमाद्यासः ॥ नमस्यंतोदिवआ
पृष्ठमस्थुःपरिद्यावापृथिवीयंतिसद्यः ॥ तत्सूर्यस्यदेवत्वंतन्महित्वंमध्या
कर्तोर्विततंसंजभार ॥ यदेदयुक्तहरितःसधस्थादाद्रात्रीवासस्तनुतेसि
मस्मै ॥ तन्मित्रस्यवरुणस्याभिचक्षेसूर्योरूपंकृणुतेद्योरुपस्थे ॥ अनंत
मन्यद्रुशदस्यपाजःकृष्णमन्यद्धरितःसंभरंति ॥ अद्यादेवाउदितासूर्य
स्यनिरंहसःपिपृतानिरवद्यात् ॥ तन्नोमित्रोवरुणोमामहंतामदितिःसिं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

धुः पृथिवी उत द्यौः ॥ ३ ॥ इत्युपस्थाय उपविश्याचम्य प्राणायामं
कृत्वा ॥ युवतीं युवादित्यमंडलमध्यस्थां श्वेतवर्णां श्वेतांबरानुलेपन-
स्रगाभरणां चतुर्वक्त्रां प्रतिवक्त्रंत्रिनेत्रां चंद्रशेखरां त्रिशूलखड्गखट्वांगड
मर्वकचतुर्भुजां वृषभासनारूढां रुद्रदैवत्यां यजुर्वेदमुदाहरंतीं भुव-
र्लोकाधिष्ठात्रीं नामदेवतां ध्यात्वा संपूज्य यथाशक्ति जपं कुर्यात् ॥
अन्यत् प्रातःसंध्यावत् ॥ इति मध्याह्नसंध्या ॥ ॥ ॥
श्रीगणेशाय नमः ॥ अथ सायंसंध्याप्रारंभः ॥ प्रातःकालवदाचमनं
प्राणायामं च कुर्यात् ॥ सायंसंध्या वृद्धा कृष्णा कृष्णवर्णा कृष्णव-
स्त्रा कृष्णगंधा कृष्णमाल्यानुलेपना गरुडवाहना विष्णुदैवत्या आह-
वनीयाग्न्युपस्थाना सामवेदसंहिता तृतीया विष्णुसंध्या सत्यवती-
नाम्नी ममोपात्तदुरितक्षयद्वारा श्रीपरमेश्वरप्रीत्यर्थं सायंसंध्योपास्तिं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

करिष्ये ॥ ततः प्रथममार्जनपर्यंतं प्रातःकालवत् ॥ अग्निश्चेति मंत्रस्य ॥ याज्ञवल्क्य उपनिषद ऋषिः ॥ अग्निमन्युमन्युपतयोऽहश्च देवताः ॥ प्रकृतिश्छंदः ॥ मंत्राचमने विनियोगः ॥ ॐ अग्निश्चमामन्युश्चमन्युपतयश्चमन्युकृतेभ्यः ॥ पापेभ्योरक्षंताम् ॥ यदह्नापापमकार्षं ॥ मनसावाचाहस्ताभ्यां ॥ पद्भ्यामुदरेणशिश्ना ॥ अहस्तदवलुंपतु ॥ यत्किंचदुरितंमयि ॥ इदमहंमाममृतयोनौ ॥ सत्येज्योतिषिजुहोमिस्वाहा ॥ आचम्य० ॥ प्रातःकालवदापोहिष्ठेति नवर्गिभर्मार्जनं कृत्वा ॥ तथा गायत्रीमंत्रेण वरुणाय त्रिवारमर्घ्यं दत्वा ॥ असावादित्यो ब्रह्म ॥ द्विराचमनं प्राणायामं च कृत्वा ॥ प्रातःकालवत् दिग्बंधासनं षडंगं तथा च गायत्रीजपः ॥ पुनश्च षडंगं कृत्वा यच्चिद्धितेति दशर्चामाजीगर्तिःशुनःशेपःसकृत्रिमो वैश्वामित्रो देवरात ऋषिः वरुणो देवता गाय

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

त्रीछंदः वरुणोपस्थाने वि० ॥ ॐयच्चिद्धितेविशोयथाप्रदेववरुणव्रतं ॥
मिनीमसिद्यविद्यवि ॥ मानोवधायहत्नवेजिहीळानस्यरीरधः ॥ माहृ
णानस्यमन्यवे ॥ विमृळीकायतेमनोरथीरश्वंनसंदितं ॥ गीर्भिर्वरुण
सीमहि ॥ पराहिमेविमन्यवःपतंतिवस्यइष्टये ॥ वयोनवसतीरुप ॥ क
दाक्षत्रश्रियंनरमावरुणंकरामहे ॥ मृळीकायोरुचक्षसं ॥ १ ॥ तदित्स
मानमाशातेवेनंतानप्रयुच्छतः ॥ धृतव्रतायदाशुषे ॥ वेदायोवीनांपद
मंतरिक्षेणपतंतां ॥ वेदनावःसमुद्रियः ॥ वेदमासोधृतव्रतोद्वादशप्र
जावतः ॥ वेदायउपजायंते ॥ वेदवातस्यवर्तनिमुरोर्ऋष्वस्यबृहतः ॥
वेदायेअध्यासंते ॥ निषसादधृतव्रतोवरुणःपस्त्यऽस्वा ॥ साम्राज्या
यसुक्रतुः ॥ यांसदास०इतःप्रातःकालसंध्यावत् ॥ इति सायंसंध्या ॥

इदं पुस्तकं तुकाराम जावजी इत्येतैःस्वीये निर्णयसागरमुद्रणालये कोलभाटलाइन घ. नं. २३.
इत्यत्र रामचंद्र येशू शेटगे द्वारा मुद्रितम्. शाके १८३९ । सन १९१७.

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥ इति ऋग्वेदीया त्रिकालसंध्या ॥

Published by Tukaram Javaji,
Printed by Ramchandra Yesu Shedge, } at the Nirnaya-sagar Press,
23, Kolbhat Lane, Bombay.

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥ अथ ऋग्वेदीया त्रिकालसंध्या ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्रीगणेशाय नमः ॥ अथभस्मधारणविधिः ॥ आचम्य प्राणायामं कृत्वा ॥ अद्येत्यादिपूर्वो० शरीरशुद्ध्यर्थं भस्मधारणमहं करिष्ये । मानं स्तोकंतनयेमानंआयौमानोगोषुमानोअश्वेषुरीरिषः ॥ वीरान्मानोरुद्र भामितोवधीर्हविष्मंतःसदमित्वाहवामहे ॥ (इति हस्ते भस्म गृहीत्वा जलमिश्रितं कृत्वा) ॥ ईशानः सर्वविद्यानामीश्वरःसर्वभूतानांब्रह्माधिपतिर्ब्रह्मणोधिपतिर्ब्रह्माशिवोमेअस्तुसदाशिवोम् ॥ शिरसि ॥ तत्पुरुषायविद्महेमहादेवायधीमहि ॥ तन्नोरुद्रःप्रचोदयात् ॥ मुखे ॥ अघोरेभ्योथघोरेभ्योघोरघोरतरेभ्यः ॥ सर्वेभ्यःसर्वशर्वेभ्योनमस्ते अस्तुरुद्ररूपेभ्यः ॥ हृदये ॥ वामदेवायनमोज्येष्ठायनमःश्रेष्ठायनमोरुद्रायनमःकालायनमःकलविकरणायनमोबलविकरणायनमोबलायनमोबलप्रमथनायनमःसर्वभूतदमनायनमोमनोन्मनायनमः ॥ गुह्ये ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सद्योजातंप्रपद्यामिसद्योजातायवैनमोनमः ॥ भवेभवेनातिभवेभवस्व
मां भवोद्भवायनमः ॥ पादयोः ॥ अग्निरिति भस्म । वायुरिति भस्म ।
जलमिति भस्म । स्थलमिति भस्म । व्योमेति भस्म । सर्वं हवा इदं
भस्म । मन एतानि चक्षूंषि भस्मानि ॥ तच्च ॥ ॐनमः शिवाय इति
त्रिवारोच्चारितेन सर्वाङ्गे विलिप्य आचामेत् ॥
श्रीगणेशाय नमः ॥ ॥ अथ प्रातःसंध्याप्रारंभः ॥ केशवाय नमः ।
नारायणाय नमः । माधवाय नमः । गोविंदाय नमः । विष्णवे नमः ।
मधुसूदनाय नमः । त्रिविक्रमाय नमः । वामनाय नमः । श्रीधराय नमः ।
हृषीकेशाय नमः । पद्मनाभाय नमः । दामोदराय नमः । संकर्षणाय
नमः । वासुदेवाय नमः । प्रद्युम्नाय नमः । अनिरुद्धाय नमः । पुरु-
षोत्तमाय नमः । अधोक्षजाय नमः । नारसिंहाय नमः । अच्युताय

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नमः । जनार्दनाय नमः । उपेंद्राय नमः । हरये नमः । श्रीकृष्णाय नमः । प्रणवस्य परब्रह्म ऋषिः परमात्मा देवता । दैवीगायत्री छंदः । सप्ताना व्याहृतीनां विश्वामित्रजमदग्निभरद्वाजगौतमात्रिवसिष्ठकश्यपा ऋषयः । अग्निवाय्वादित्यबृहस्पतिवरुणेंद्रविश्वेदेवा देवताः । गायत्र्युष्णिगनुष्टुब्बृहतीपंक्तित्रिष्टुप्जगत्यश्छंदांसि । गायत्र्या विश्वामित्र ऋषिः । सविता देवता । गायत्री छंदः । गायत्रीशिरसः प्रजापतिर्ऋषिः । ब्रह्माग्निवाय्वादित्या देवताः यजुश्छंदः । प्राणायामे विनियोगः ॥ ॐभूः ॐभुवः ॐस्वः ॐमहः ॐजनः ॐतपः ॐसत्यं ॐतत्स॑वि॒तुर्वरे॑ण्यं॒भर्गो॑दे॒वस्य॑धीमहि ॥ धियो॒योन॑ःप्रचो॒दया॑त् ॥ ॐआपोज्योतीरसोमृतंब्रह्मभूर्भुवःस्वरोम् ॥ ममोपात्तदुरितक्षयद्वारा श्रीपरमेश्वरप्रीत्यर्थं प्रातःसंध्यामुपासिष्ये । आपोहिष्ठेति तृचस्यां-

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

बरीषः सिंधुद्वीप ऋषिः । आपो देवता गायत्री छंदः । मार्जने विनि-
योगः॥ ॐआपोहिष्ठामयोभुवस्तानऊर्जेदधातन॥ महेरणायचक्षसे॥
योवःशिवतमोरसस्तस्यभाजयतेहनः ॥ उशतीरिवमातरः॥ तस्माअ
रंगमामवोयस्यक्षयायजिन्वथ ॥ आपोजनयथाचनः॥ सूर्यश्चेति मं-
त्रस्य याज्ञवल्क्य उपनिषद् ऋषिः । सूर्यमन्युमन्युपतिरात्रयो देव-
ताः । प्रकृतिश्छंदः । मंत्राचमने विनियोगः ॥ ॐसूर्यश्चमामन्यु-
श्चमन्युपतयश्चमन्युकृतेभ्यः ॥ पापेभ्योरक्षंताम् ॥ यद्रात्रियापापम
कार्षं ॥ मनसावाचाहस्ताभ्यां ॥ पद्भ्यामुदरेणशिश्ना ॥ रात्रिस्तदव
लुंपतु ॥ यत्किंचदुरितंमयि ॥ इदमहंमाममृतयोनौ ॥ सूर्येज्योतिषिजु
होमिस्वाहा ॥ इति जलं पीत्वा आचम्य ॥ आपोहिष्ठेति नवर्चस्य
सूक्तस्यांबरीषः सिंधुद्वीप आपो गायत्री । पंचमी वर्धमाना सप्तमी

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

प्रतिष्ठा अंत्ये द्वे अनुष्टुभौ ॥ मार्जने विनियोगः ॥ ॐआपोहिष्ठेति
ऋक्त्रयम् ॥ शंनोदेवीरभिष्टयआपोभवंतुपीतये ॥ शंयोरभिस्रवंतु
नः ॥ ईशानावार्याणांक्षयंतीश्चर्षणीनाम् ॥ अपोयाचामिभेषजम् ॥
अप्सुमेसोमोअब्रवीदंतर्विश्वानिभेषजा ॥ अग्निंचविश्वशंभुवम् ॥ आ-
पःपृणीतभेषजंवरूथंतन्वे३ममं ॥ ज्योकचसूर्यंदृशे ॥ इदमापःप्रवह
तयत्किंचदुरितंमयि ॥ यद्वाहमभिदुद्रोहयद्वाशेपउतानृतम् ॥ आपोअ
द्यान्वचारिषंरसेनसमगस्महि ॥ पयस्वानग्नआगहितंमासंसृजवर्चसा ॥
सस्रुषीस्तदपसोदिवानक्तंसस्रुषीः ॥ वरेण्यक्रतूरहमादेवीरवसेहुवे ॥
ऋतंचेति तृचस्य सूक्तस्य माधुच्छंदसोऽघमर्षण ऋषिः । भाववृत्ति
देवता । अनुष्टुप् छंदः । जलाघमर्षणे विनियोगः ॥ ॐऋतंचसत्यं
चाभीद्धात्तपसोध्यजायत ॥ ततोरात्र्यजायततःसमुद्रोअर्णवः ॥ स

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मुद्रादर्णवादधिसंवत्सरोअजायत ॥ अहोरात्राणिविदधद्विश्वस्यमिषतोवशी ॥ सूर्याचंद्रमसौधातायथापूर्वमकल्पयत् ॥ दिवंचपृथिवींचांतरिक्षमथोस्वः ॥ दक्षिणनासया पापपुरुषं निरस्य तज्जलं नावलोक्य वामभागे क्षितौ क्षिपेत् । आचम्य ॥ गायत्र्या विश्वामित्रः सविता गायत्री । श्रीसूर्यायार्घ्यदाने विनियोगः ॥ ॐभूर्भुवःस्वः तत्सवितुर्व० श्रीसवितृसूर्यनारायणाय इदमर्घ्यं दत्तं न मम ॥ इति त्रिः । आचम्य प्राणायामं कृत्वा ॥ पृथ्वीति मंत्रस्य मेरुपृष्ठऋषिः ॥ कूर्मो देवता । सुतलं छंदः । आसने विनियोगः ॥ ॐपृथ्वि त्वया धृता लोका देवि त्वं विष्णुना धृता ॥ त्वं च धारय मां देवि पवित्रं कुरु चासनम् । ऊर्ध्वकेशि विरूपाक्षि मांसशोणितभक्षणे ॥ तिष्ठ देवि शिखाबंधे चामुंडे ह्यपराजिते ॥ अपसर्पंतु ते भूता ये भूता भूमिसंस्थि-

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ताः ॥ ये भूता विघ्नकर्तारस्ते गच्छंतु शिवाज्ञया ॥ अपक्रामंतु भू-
तानि पिशाचाः सर्वतोदिशम् ॥ सर्वेषामविरोधेन ब्रह्मकर्म समा-
रभे ॥ गायत्र्या विश्वामित्र ऋषिः । सविता देवता । गायत्री छंदः ।
न्यासे विनियोगः । ॐतत्सवितुर्हृदयाय नमः । वरेण्यं शिरसे स्वाहा ।
भर्गोदेवस्य शिखायै वषट् । धीमहि कवचाय हुम् । धियोयोनो ने-
त्रत्रयाय वौषट् । प्रचोदयात् अस्त्राय फट् । इति दिग्बंधः ॥ बालां
बालादित्यमंडलमध्यस्थां रक्तवर्णां रक्तांबरानुलेपनस्रगाभरणां चतु-
र्वक्त्रां दंडकमंडल्वक्षसूत्राभयांकचतुर्भुजां हंसासनारूढां ब्रह्मदैवत्या-
मृग्वेदमुदाहरंतीं भूर्लोकाधिष्ठात्रीं गायत्रीं नाम देवतां ध्यायामि ॥
आगच्छ वरदे देवि जपे मे संनिधौ भव ॥ गायंतं त्रायसे यस्माद्गाय-
त्री त्वं ततः स्मृता ॥ गायत्रीजपमहं करिष्ये ॥ अष्टोत्तरशतमष्टाविंश-

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तिर्दशवारं वा गायत्रीं जप्त्वा ॥ पुनः तत्सवितुरिति षडंगन्यासं कृत्वा उपस्थानं कुर्यात् ॥ जातवेदसे मारीचः कश्यपो जातवेदा अग्निस्त्रिष्टुप् ॥ उपस्थाने विनियोगः ॥ ॐ जातवेदसे सुनवाम सोममरातीयतो-निदहाति वेदः ॥ सनः पर्षदति दुर्गाणि विश्वा नावेव सिंधुं दुरितात्यग्निः ॥ मित्रो जनानिति नवर्चस्य सूक्तस्य गाथिनो विश्वामित्रः सविता त्रिष्टुप् अंत्याश्चतस्रो गायत्र्यः सूर्योपस्थाने विनियोगः ॥ ॐ मित्रो जनान्यातयति ब्रुवाणो मित्रो दाधार पृथिवीमुत द्यां ॥ मित्रः कृष्टीरनिमिषाभि चष्टे मित्राय हव्यं घृतवज्जुहोत ॥ प्र समित्रमर्तो अस्तु प्रयस्वान्यस्त आदित्य शिक्षति व्रतेन ॥ नहन्यते न जीयते त्वोतो नैनमंहो अश्नोत्यंतितो न दूरात् ॥ अनमीवास इळया मदंतो मित्तज्ञवो वरिमन्ना पृथिव्याः ॥ आदित्यस्य व्रतमुपक्षियंतो वयं मित्रस्य सुमतौ स्याम ॥ अयं मित्रो नमस्यः सुशे

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वोराजासुक्षत्रोअजनिष्टवेधाः ॥ तस्यवयंसुमतौयज्ञियस्यापिभद्रेसौम
नसेस्याम ॥ महाँआदित्योनमसोपसद्योयातयज्जनोगृणतेसुशेवः ॥
तस्माएतत्पन्यतमायजुष्टमग्नौमित्रायहविराजुहोत ॥ मित्रस्यर्षणी
धृतोऽवोदेवस्यसानसि ॥ द्युम्नंचित्रश्रवस्तमम् ॥ अभियोमहिनादिवं
मित्रोबभूवसप्रथाः ॥ अभिश्रवोभिःपृथिवीम् ॥ मित्रायपंचयेमिरेज
नाअभिष्टिशवसे ॥ सदेवान्विश्वान्बिभर्ति ॥ मित्रोदेवेष्वायुषुजनायवृ-
क्तबर्हिषे ॥ इषइष्टव्रताअकः ॥ त्र्यंबकं मैत्रावरुणिर्वसिष्ठो रुद्रोऽनु-
ष्टुप् । उपस्थाने विनियोगः ॥ ॐत्र्यंबकंयजामहेसुगंधिंपुष्टिवर्धनम् ॥
उर्वारुकमिवबंधनान्मृत्योर्मुक्षीयमामृतात् ॥ तच्छंयोः शंयुर्विश्वेदेवाः
शक्करी । उपस्थाने विनियोगः ॥ ॐतच्छंयोरावृणीमहेगातुंयज्ञायगा-
तुंयज्ञपतयेदैवीःस्वस्तिरस्तुनःस्वस्तिर्मानुषेभ्यः ॥ ऊर्ध्वंजिगातुभेष-

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

जम् ॥ शंनोअस्तुद्विपदेशंचतुष्पदे ॥ नमो ब्रह्मणे प्रजापतिर्वि-
श्वेदेवा जगती । उपस्थाने विनियोगः ॥ ॐनमोब्रह्मणेनमोअ
स्त्वग्नयेनमःपृथिव्यैनमओषधीभ्यः ॥ नमोवाचेनमोवाचस्पतयेनमो
विष्णवेमहतेकरोमि ॥ प्राच्यै दिशे इंद्राय च नमः । आग्नेय्यै दिशे
अग्नये च नमः । दक्षिणायै दिशे यमाय च नमः । नैर्ऋत्यै दिशे
निर्ऋतये च नमः । प्रतीच्यै दिशे वरुणाय च नमः । वायव्यै दिशे
वायवे च नमः । उदीच्यै दिशे सोमाय च नमः । ईशान्यै दिशे ईश्व-
राय च नमः । ऊर्ध्वायै दिशे ब्रह्मणे च नमः । अधरायै दिशे अनं-
ताय च नमः । संध्यायै नमः । गायत्र्यै नमः । सावित्र्यै नमः । सरस्वत्यै
नमः । सर्वाभ्यो देवताभ्यो नमः ॥ यां सदा सर्वभूतानि स्थावराणि
चराणि च ॥ सायं प्रातर्नमस्यंति सा मा संध्याऽभिरक्षतु ॥ अमुक

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

गोत्रामुकप्रवरोत्पन्नोऽहममुकशर्मा भो गुरो त्वामभिवादयामि ॥ उत्तमे शिखरे जाते भूम्यां पर्वतमूर्धनि ॥ ब्राह्मणेभ्योऽभ्यनुज्ञाता गच्छ देवि यथासुखम् ॥ भद्रंनोअपिवातयमनः ॥ ॐ शांतिःशांतिःशांतिः ॥ प्रदक्षिणं परिभ्रमन् । आसत्यलोकादापातालादालोकालोकपर्वतात् ॥ ये संति ब्राह्मणा देवास्तेभ्यो नित्यं नमो नमः ॥ इति गुरूनभिवादयेत् । अनेन प्रातःसंध्यावंदनेन कर्मणा श्रीपरमेश्वरः प्रीयतां ॥ ॐ तत्सद्ब्रह्मार्पणमस्तु ॥ ॥ ॥

श्रीगणेशाय नमः ॥ आचम्य प्राणानायम्य ॥ ममोपात्तदुरितक्षयद्वारा श्रीपरमेश्वरप्रीत्यर्थं मध्याह्नसंध्यामुपासिष्ये ॥ आपोहिष्ठेति तृचेन पूर्ववत्प्रथमं मार्जनं कृत्वा मंत्राचमनं कार्यं ॥ आपः पुनंत्वित्यस्यानुवाकस्य नारायण आपो अष्टिः मंत्राचमने विनियोगः ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ॐ आपः पुनंतुपृथिवींपृथिवीपूतापुनातुमां ॥ पुनंतुब्रह्मणस्पतिर्ब्रह्म पूतापुनातुमां ॥ यदुच्छिष्टमभोज्यंयद्वादुश्चरितंमम ॥ सर्वंपुनंतुमामापोसतांचप्रतिग्रहꣳस्वाहा ॥ इति अपः पीत्वा । आचम्य प्रातःसंध्यावत् द्वितीयं मार्जनं अघमर्षणांतं कृत्वा ॥ हंसःशुचिषदिति मंत्रस्य गोतमो वामदेवः सूर्यो जगती ॥ अर्घ्यदाने विनियोगः ॥ ॐ हंसः शुचिषद्वसुरंतरिक्षसद्धोतावेदिषदतिथिर्दुरोणसत् ॥ नृषद्वरसदृतसद्व्योमसदब्जागोजाऋतजाअद्रिजाऋतं ॥ श्रीसूर्याय इदमर्घ्यं दत्तं न मम ॥ आत्मानं परिषिच्य द्विराचम्य ॥ ऊर्ध्वबाहुरुन्मुखःसूर्यमुपतिष्ठेत ॥ उदुत्यमिति त्रयोदशर्चस्य सूक्तस्य काण्वः प्रस्कण्व ऋषिः श्रीसूर्यो देवता नवाद्या गायत्र्यः अंत्याश्चतस्रोनुष्टुभः ॥ चित्रं देवानामिति षळृचस्य सूक्तस्य आंगिरसः कुत्सः सूर्यस्त्रिष्टुप् सूर्योपस्थाने

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

विनियोगः ॥ ॐउदुत्यंजातवेदसंदेवंवहंतिकेतवः ॥ दृशेविश्वायसूर्यं ॥
अपत्येतायवोयथानक्षंत्रायंत्यक्तुभिः ॥ सूरायविश्वचक्षसे ॥ अदृश्रम
स्यकेतवोविरश्मयोजनाँअनु ॥ भ्राजंतोअग्नयोयथा ॥ तरणिर्विश्वद
र्शतोज्योतिष्कृदसिसूर्य ॥ विश्वमाभासिरोचनं ॥ प्रत्यङ्देवानांविशः
प्रत्यङ्ङुदेषिमानुषान् ॥ प्रत्यङ्विश्वंस्वर्दृशे ॥ १ ॥ येनापावकचक्ष
साभुरण्यंतंजनाँअनु ॥ त्वंवरुणपश्यसि ॥ विद्यामेषिरजस्पृथ्वहामि
मानोअक्तुभिः ॥ पश्यन्जन्मानिसूर्य ॥ सप्तत्वाहरितोरथेवहंतिदेव
सूर्य ॥ शोचिष्केशंविचक्षण ॥ अयुक्तसप्तशुध्युवःसूरोरथस्यनप्त्यः ॥
ताभिर्यातिस्वयुक्तिभिः ॥ उद्वयंतमसस्परिज्योतिष्पश्यंतउत्तरं ॥ देवं
देवत्रासूर्यमगन्मज्योतिरुत्तमं ॥ उद्यन्नद्यमित्रमहआरोहन्नुत्तरांदिवं ॥
हृद्रोगंममसूर्यहरिमाणंचनाशय ॥ शुकेषुमेहरिमाणंरोपणाकासुदध्म

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सि ॥ अथोहारिद्रवेषुमेहरिमाणंनिदध्मसि ॥ उदगादयमादित्योवि
श्वेनसहसासह ॥ द्विषंतंमह्यंरंधयन्मोअहंद्विषतेरंधं ॥ २ ॥ चित्रंदेवा
नामुदगादनीकंचक्षुर्मित्रस्यवरुणस्याग्नेः ॥ आप्राद्यावापृथिवीअंतारि
क्षंसूर्यआत्माजगतस्तस्थुषश्च ॥ सूर्योदेवीमुषसंरोचमानांमर्योनयोषा
मभ्येतिपश्चात् ॥ यत्रानरोदेवयंतोयुगानिवितन्वतेप्रतिभद्रायभद्रं ॥
भद्राअश्वाहरितःसूर्यस्यचित्राएतग्वाअनुमाद्यासः ॥ नमस्यंतोदिवआ
पृष्ठमस्थुःपरिद्यावापृथिवीयंतिसद्यः ॥ तत्सूर्यस्यदेवत्वंतन्महित्वंमध्या
कर्तोर्विततंसंजभार ॥ यदेदयुक्तहरितःसधस्थादाद्रात्रीवासस्तनुतेसि
मस्मै ॥ तन्मित्रस्यवरुणस्याभिचक्षेसूर्योरूपंकृणुतेद्योरुपस्थे ॥ अनंत
मन्यद्रुशदस्यपाजःकृष्णमन्यद्धरितःसंभरंति ॥ अद्यादेवाउदितासूर्य
स्यनिरंहसःपिपृतानिरवद्यात् ॥ तन्नोमित्रोवरुणोमामहंतामदितिःसिं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

धुः पृथिवीउतद्यौः ॥ ३ ॥ इत्युपस्थाय उपविश्याचम्य प्राणायामं
कृत्वा ॥ युवतीं युवादित्यमंडलमध्यस्थां श्वेतवर्णां श्वेतांबरानुलेपन-
स्रगाभरणां चतुर्वक्त्रां प्रतिवक्त्रंत्रिनेत्रां चंद्रशेखरां त्रिशूलखड्गखट्वांगड
मर्वकचतुर्भुजां वृषभासनारूढां रुद्रदैवत्यां यजुर्वेदमुदाहरंतीं भुव-
र्लोकाधिष्ठात्रीं नामदेवतां ध्यात्वा संपूज्य यथाशक्ति जपं कुर्यात् ॥
अन्यत् प्रातःसंध्यावत् ॥ इति मध्याह्नसंध्या ॥ ॥ ॥
श्रीगणेशाय नमः ॥ अथ सायंसंध्याप्रारंभः ॥ प्रातःकालवदाचमनं
प्राणायामं च कुर्यात् ॥ सायंसंध्या वृद्धा कृष्णा कृष्णवर्णा कृष्णव-
स्त्रा कृष्णगंधा कृष्णमाल्यानुलेपना गरुडवाहना विष्णुदैवत्या आह-
वनीयाग्न्युपस्थाना सामवेदसंहिता तृतीया विष्णुसंध्या सत्यवती-
नाम्नी ममोपात्तदुरितक्षयद्वारा श्रीपरमेश्वरप्रीत्यर्थं सायंसंध्योपास्तिं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

करिष्ये ॥ ततः प्रथममार्जनपर्यंतं प्रातःकालवत् ॥ अग्निश्चेति मंत्रस्य ॥ याज्ञवल्क्य उपनिषद ऋषिः ॥ अग्निमन्युमन्युपतयोऽहश्च देवताः ॥ प्रकृतिश्छंदः ॥ मंत्राचमने विनियोगः ॥ ॐ अग्निश्चमामन्युश्चमन्युपतयश्चमन्युकृतेभ्यः ॥ पापेभ्योरक्षंताम् ॥ यदह्नापापमकार्षं ॥ मनसावाचाहस्ताभ्यां ॥ पद्भ्यामुदरेणशिश्ना ॥ अहस्तदवलुंपतु ॥ यत्किंचदुरितंमयि ॥ इदमहंमाममृतयोनौ ॥ सत्येज्योतिषिजुहोमिस्वाहा ॥ आचम्य० ॥ प्रातःकालवदापोहिष्ठेति नवर्गिभर्मार्जनं कृत्वा ॥ तथा गायत्रीमंत्रेण वरुणाय त्रिवारमर्घ्यं दत्वा ॥ असावादित्यो ब्रह्म ॥ द्विराचमनं प्राणायामं च कृत्वा ॥ प्रातःकालवत् दिग्बंधासनं षडंगं तथा च गायत्रीजपः ॥ पुनश्च षडंगं कृत्वा यच्चिद्धितेति दशर्चामाजीगर्तिःशुनःशेपःसकृत्रिमो वैश्वामित्रो देवरात ऋषिः वरुणो देवता गाय

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

त्रीछंदः वरुणोपस्थाने वि० ॥ ॐयच्चिद्धितेविशोयथाप्रदेववरुणव्रतं ॥
मिनीमसिद्यविद्यवि ॥ मानोवधायहत्नवेजिहीळानस्यरीरधः ॥ माहृ
णानस्यमन्यवे ॥ विमृळीकायतेमनोरथीरश्वंनसंदितं ॥ गीर्भिर्वरुण
सीमहि ॥ पराहिमेविमन्यवःपतंतिवस्यइष्टये ॥ वयोनवसतीरुप ॥ क
दाक्षत्रश्रियंनरमावरुणंकरामहे ॥ मृळीकायोरुचक्षसं ॥ १ ॥ तदित्स
मानमाशातेवेनंतानप्रयुच्छतः ॥ धृतव्रतायदाशुषे ॥ वेदायोवीनांपद
मंतरिक्षेणपतंतां ॥ वेदनावःसमुद्रियः ॥ वेदमासोधृतव्रतोद्वादशप्र
जावतः ॥ वेदायउपजायंते ॥ वेदवातस्यवर्तनिमुरोर्ऋष्वस्यबृहतः ॥
वेदायेअध्यासंते ॥ निषसादधृतव्रतोवरुणःपस्त्यइ३स्वा ॥ साम्राज्या
यसुक्रतुः ॥ यांसदास०इतःप्रातःकालसंध्यावत् ॥ इति सायंसंध्या ॥

इदं पुस्तकं तुकाराम जावजी इत्येतैःस्वीये निर्णयसागरमुद्रणालये कोलभाटलाइन घ. नं. २३.
इत्यत्र रामचंद्र येशू शेटगे द्वारा मुद्रितम्. शाके १८३९ । सन १९१७.

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

M-980

॥ इति ऋग्वेदीया त्रिकालसंध्या ॥

Published by Tukaram Javaji,
Printed by Ramchandra Yesu Shedge, } at the Nirnaya-sagar Press,
23, Kolbhat Lane, Bombay.

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

[OrderDescription]
,CREATED=10.08.20 11:37
,TRANSFERRED=2020/08/10 at 11:42:24
,PAGES=41
,TYPE=STD
,NAME=S0003454
,Book Name=M-980-SHRIGVEDIYA TRIKAL SANDHYA MUDRIT
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF
,FILE7=00000007.TIF
,FILE8=00000008.TIF

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

FILE9=00000009.TIF
,FILE10=00000010.TIF
,FILE11=00000011.TIF
,FILE12=00000012.TIF
,FILE13=00000013.TIF
,FILE14=00000014.TIF
,FILE15=00000015.TIF
,FILE16=00000016.TIF
,FILE17=00000017.TIF
,FILE18=00000018.TIF
,FILE19=00000019.TIF
,FILE20=00000020.TIF
,FILE21=00000021.TIF
,FILE22=00000022.TIF
,FILE23=00000023.TIF
,FILE24=00000024.TIF
,FILE25=00000025.TIF

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

FILE26=00000026.TIF
,FILE27=00000027.TIF
,FILE28=00000028.TIF
,FILE29=00000029.TIF
,FILE30=00000030.TIF
,FILE31=00000031.TIF
,FILE32=00000032.TIF
,FILE33=00000033.TIF
,FILE34=00000034.TIF
,FILE35=00000035.TIF
,FILE36=00000036.TIF
,FILE37=00000037.TIF
,FILE38=00000038.TIF
,FILE39=00000039.TIF
,FILE40=00000040.TIF
,FILE41=00000041.TIF
,

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection